न्नानादेवताका अग्निदेवताका वा तत्र याज्यादि २,१२,१,३, ४,५,६,७,८,९,सू० । सर्वाश्च एता दर्शपौर्णमासेतिकर्तव्यताकाः । पशुगुणके कर्म्मणि पशोरुभयतोऽन्यतरतो वा पशुकामेष्टिः सा च आग्नेयी आग्नावैष्णवी वा आश्व० श्रौ०सू० ३,१,२,३,४ सू०। तस्यामितिकर्त्तव्यतायाज्यादि तदुत्तरसूत्रजातैरुक्तम् । विध्यपराधप्रायश्चित्तीष्टिः ३, १०,१,सू० विध्यपराधस्वरूपकारणप्रदर्शनपूर्वकं तत्करणप्रकारादि तदुत्तरसूत्रजातैर्दर्शितम् । वारुणीष्टिः तत्प्रकारादि ३,१२,५, प्रातःकालातिपत्तौ प्रातरिष्टिः तत्र देवतादि ३,१२,१२, आर्त्त्यांश्रुपाते च सैवेष्टिः ३,१२,१५ निमित्तभेदेर्थ्य प्रायश्चित्तीष्टौ देवताभेदादि ३,१२,१६, आरभ्य आध्यायात् सूत्रैरुक्तम् । उखासम्भरणीयेष्टिः तद्देवतादि ४,१,२१ २६ सू०। दीक्षाप्रयोजनेष्टिः दीक्षणीया नाम तत्रदेवतादि ४,२,१,१८, सू०पर्य्यन्तेनोक्तम् । प्रायणीयेष्टिः तत्र देवतादि ४,३,१सूत्रादौ। आतिथ्येष्टिः तत्र देवतादि ४,५,१सूत्रादौ । उदयनीयेष्टिः तद्देवतादि ६,१४,१, सूत्रादौ उदवसनीयेष्टिः तद्देवतादि ६,१४,१, २२, सूत्रादौ । अन्याः पुनराधेयेष्टिप्रभृतयोऽपि इष्टयः विस्तरभयान्नोक्ताः आकरेषु द्रष्टव्याः ।

शत०ब्रा० १,६,२,१२, इष्टिकरणप्रकारविशेषो दर्शितः यथा । "स यदीष्टिं कुर्वीत सप्तदश सामिधेनीरनुब्रूयादुपांशु देवता यजति तद्धीष्टिरूपं, मूर्द्धन्वतौ याज्यानुवाक्ये स्यातां वार्तघ्नावाज्यभागौ, विराजौ संयाज्ये" "अग्नेरिष्टिमभिधाय अथ पृथक् प्रयोक्तव्याया आग्नेयेष्टेर्वैशेषिकमङ्गजातमाह । यदीष्टिं दर्शपूर्णमासाभ्यां पृथगेव कुर्वीत प्रधानदेवता उपांशु यजेत तदुपांशुत्वं काम्येष्टिरूपं खलु । मूर्द्धन्वत्यौ "अग्निर्मूर्द्धा" "भुवो यज्ञस्य" इत्येते। (यजु०१३,१४.१५,) मूर्द्धन् शब्दवत्यौ प्रधानस्य याज्ये स्विष्टकृद्याज्यापुरोऽनुवाक्ये, विराजौ विराट्छन्दस्के "प्रेद्धो अग्ने" "इमो अग्न" इत्येते (यजु०१७,७६,७७, ) भवतः" भा०

दर्शपौर्णमासयागं कृत्वा प्रायश्चित्तेष्टिः कार्य्या तत्प्रकारः शत०ब्रा० ११,१,३,१,दर्शितो यथा ।"पौर्णमासेनेष्ट्वा इन्द्राय विमृधेऽनुनिर्वपति तेन यथेष्ट्यैवं यजतआमावास्येनेष्ट्वा-अदित्यै चरुमनुनिर्वपति तेन यथेष्ट्यैवं यजते १ । स यत्पौर्णमासेनेष्ट्वा इन्द्राय विमृधेऽनुनिर्वपतीन्द्रो वै यज्ञस्य देवताग्नैतदग्नीषोमीयं पौर्णमासं हविर्भवति तत्र नेन्द्राय त्वेति किं चन क्रियते एतेनो हास्यैतत् सैन्द्रं हविर्भवत्येतेन सैन्द्रो यज्ञोऽथ यद्विमृधे त्वेति सर्वा उ हि मृधो नाष्ट्राः पौर्णमासेन हन्ति २ । अथ यदामावास्येनेष्ट्वा अदित्यै चरुमनुनिर्वपत्येष वै सोमो राजा देवानामन्नं यच्चन्द्रमाः स यत्रैष एतां रात्रिं न पुरस्तान्न पश्चाद्ददृशे तेनैतदनद्धेव हविर्भवति तेनाप्रतिष्ठितमियं वै पृथिव्यदितिः सेयमद्धा सेयं प्रतिष्ठितैतेन हास्यैतदद्धेव हविर्भवत्येतेन नाप्रतिष्ठितमेतन्नु तद्यस्मादनुनिर्वपत्यथ तस्मादनुनिर्वपेत् ३ । स यत्पौर्णमासेनेष्ट्वा इन्द्राय विमृधेऽनुनिर्वपति सैन्द्रो मे यज्ञोऽसदिति सर्वो वै यज्ञ इन्द्रस्यैव स यत्सर्वो यज्ञ इन्द्रस्यैवैतेनो हास्यैतत् सैन्द्रं हविर्भवत्येतेन सैन्द्रो यज्ञः ४। अथ यदामावास्येनेष्ट्वा अदित्यै चरुमनुनिर्वपत्यामावास्यं वा अनुनिर्वाप्यं पौर्णमासेन वा इन्द्रो वृत्रमहंस्तस्मा एतद्वृत्रं जघ्नुषे देवा एतद्धविरनुनिरवपन् यदामावास्यं किमनुनिर्वाप्येऽनुनिर्वपेदिति तस्मान्नानुनिर्वपेत् ५ । स यत् पौर्णमासेनेष्ट्वा अथान्यद्धविरनुनिर्वपत्यामावास्येनेष्ट्वाथान्यद्धविरनुनिर्वपति द्विषन्तं ह स भ्रातृव्यं प्रत्युच्छ्रयतेऽथ यः पौर्णमासेनैव पौर्णमासीं यजतआमावास्येनामावास्यामसपत्ना हैवास्यानुपबाधा श्रीर्भवति ६ । पौर्णमासेन वै देवाः पौर्णमासीं यजमाना आमावास्येनामावास्यां क्षिप्रएव पाप्मानमपाघ्नत क्षिप्रे प्रायाजन्त स यो हैवं विद्वान् पौर्णमासेनैव पौर्णमासीं यजतआमावास्येनामावास्यां क्षिप्रएव पाप्मानमपहते क्षिप्रे प्रजायते स यद्यनुनिर्वपेद्द्याद्दक्षिणां नादक्षिणं हविः स्यादिति ह्याहुर्दर्शपूर्णमासयोर्ह्येवैषा दक्षिणा यदन्वाहार्य इति न्वनुनिर्वाप्यस्याथाभ्युदितस्य७" २कण्डिका ।"अद्यामावास्येति मन्यमान उपवसति । अथैष पश्चाद्ददृशे स हैष दिव्यः श्वा, स यजमानस्य पशूनभ्यवेक्षते तदपशव्यं स्यादप्रायश्चित्तिकृत एतस्माद् हैतद्भीषावचन्द्रमसादिति" १ । छायामुपसर्पन्ति । एतेनो हैतदुपतपदाचक्षते श्वलुचितमित्येतस्य हैवैतदाचक्षते २ । शशस्यान्द्रमस इति । चन्द्रमा वै सोमो देवानामन्नं तं पौर्णमास्यामभिषुण्वन्ति सोऽपरपक्षेऽप ओषधीः प्रविशति पशवो वा अप औषधीरदन्ति तदेनमेतां रात्रिं पशुभ्यः संनयति ३ । सोऽद्यामावास्येति मन्यमान उपवसति । अथैष पश्चाद्ददृशे तद्यजमानो यज्ञपथादेति तदाहुः कथं कुर्यादित्वा यज्ञपथाद्यजेता३ न यजेता३ इति यजेत हैव न ह्यन्यदपक्रमणं भवति श्वः-श्वः एवैष ज्यायानुदेति स आमावास्यविधेनैवेष्ट्वाथेष्टिमनुनिर्वपति तदहर्वैव श्वो वा ४ । तस्य त्रीणि हवींषि भवन्ति । अग्नये पथिकृतेऽष्टाकपालं पुरोडाशम्, इन्द्राय वृत्रघ्न एकादशकपा-